श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७३

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७३

*मधुरापुरयात्रावर्णनम्*

निशमय्य तवाथ यानवार्तां भृशमार्ताः पशुपालबालिकास्ताः।
किमिदं किमिदं कथं न्वितीमाः समवेताः परिदेवितान्यकुर्वन्॥ १ ॥

करुणानिधिरेष नन्दसूनुः कथमस्मान् विसृजेदनन्यनाथाः।
बत नः किमु दैवमेवमासीदिति तास्त्वद्गतमानसा विलेपुः॥ २ ॥

चरमप्रहरे प्रतिष्ठमानः सह पित्रा निजमित्रमण्डलैश्च।
परितापभरं नितम्बिनीनां शमयिष्यन् व्यमुचः सखायमेकम्॥ ३ ॥

अचिरादुपयामि सन्निधिं वो भविता साधु मयैव सङ्गमश्रीः।
अमृताम्बुनिधौ निमज्जयिष्ये द्रुतमित्याश्वसिता वधूरकार्षीः॥ ४ ॥

सविषादभरं सयाच्ञमुच्चैः अतिदूरं वनिताभिरीक्ष्यमाणः।
मृदु तद्दिशि पातयन्नपाङ्गान् सबलोऽक्रूररथेन निर्गतोऽभूः॥ ५ ॥

अनसा बहुलेन वल्लवानां मनसा चानुगतोऽथ वल्लभानाम्।
वनमार्तमृगं विषण्णवृक्षं समतीतो यमुनातटीमयासीः॥ ६ ॥

नियमाय निमज्य वारिणि त्वामभिवीक्ष्याथ रथेऽपि गान्दिनेयः।
विवशोऽजनि किं न्विदं विभोस्ते ननु चित्रं त्ववलोकनं समन्तात्॥ ७ ॥

पुनरेष निमज्य पुण्यशाली पुरुषं त्वां परमं भुजङ्गभोगे।
अरिकम्बुगदाम्बुजैः स्फुरन्तं सुरसिद्धौघपरीतमालुलोके॥ ८ ॥

स तदा परमात्मसौख्यसिन्धौ विनिमग्नः प्रणुवन् प्रकारभेदैः।
अविलोक्य पुनश्च हर्षसिन्धोरनुवृत्या पुलकावृतो ययौ त्वाम्॥ ९ ॥

किमु शीतळिमा महान् जले यत् पुळकोऽसाविति चोदितेन तेन।
अतिहर्षनिरुत्तरेण सार्धं रथवासी पवनेश पाहि मां त्वम्॥ १० ॥

**********